# Kashisthitan Panchavinayakapujopadesham

# કાશીસ્થિતાન્ પઞ્ચવિનાયકપૂજોપદેશમ્

## Document Information

Text title : Kashisthitan Panchavinayakapujopadesham

File name : kAshIsthitAnpanchavinAyakapUjopadesham.itx

Category : ganesha, upadesha, advice, shiva, shivarahasya

Location : doc_ganesha

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 12 | 83-98||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# કાશીસ્થિતાન્ પઞ્ચવિનાયકપૂજોપદેશમ્

- શિવપાર્વતીસંવાદે -

પૂજનીયાઃ પ્રયત્નેન સર્વથા મોદકપ્રિયાઃ ।
શિવપ્રીતિકરા નિત્યં શુદ્ધાઃ પઞ્ચવિનાયકાઃ ॥ ૮૩ ॥

ક્ષિપ્રસિદ્ધિકરં ક્ષિપ્રં ગણેશં સુરવન્દિતમ્ ।
સમ્પૂજ્ય પૂર્વવત્સમ્યગ્જગદીશં વિનાયકમ્ ॥ ૮૪ ॥

આશાવિનાયકં સમ્યક્પૂજયિત્વા તતઃ પરમ્ ।
અર્કવિઘ્નેશ્વરં(રઃ) સમ્યક્પૂજનીયઃ પ્રયત્નતઃ ॥ ૮૫ ॥

પૂર્વવત્પૂજયિત્વા તુ તત્ર સિદ્ધિવિનાયકમ્ ।
પૂજનીયસ્તતઃ સમ્યક્ ચિન્તામણિવિનાયકઃ ॥ ૮૬ ॥

સેનાવિનાયકોઽપ્યેવં સમ્પૂજ્ય તદનન્તરમ્ ।
દુર્ગાવિનાયકસ્યાપિ પૂજા કાર્યા તતઃ પરમ્ ॥ ૮૭ ॥

એવં સમ્પૂજ્ય વિધિવદ્ભક્તિશ્રદ્ધાસમન્વિતૈઃ ।
શૈવાઃ શઙ્કરતત્ત્વજ્ઞા ભોજનીયાઃ પ્રયત્નતઃ ॥ ૮૮ ॥

એવં સમ્પૂજિતાઃ સમ્યક્પ્રીતાસ્તે ગણનાયકાઃ ।
કાશીવાસં પ્રયચ્છન્તિ નિર્વિઘ્નેનૈવ સાદરમ્ ॥ ૮૯ ॥

આજ્યેન કાપિલેનૈવ સાર્ધલક્ષત્રયાહુતીઃ ।
હુત્વૈતન્નાભિઃ સમ્યક્સર્વવિદ્યાધિપો ભવેત્ ॥ ૯૦ ॥

એતાનિ દિવ્યનામાનિ પ્રતિવાસરમાદરાત્ ।
પઠિત્વા ગણનાથસ્ય પૂજા કાર્યા પ્રયત્નતઃ ॥ ૯૧ ॥

યસ્ય કસ્યાપિ સન્તુષ્ટો ગણપઃ સર્વસિદ્ધિદઃ ।
અત એવ સદા પૂજ્યો ગણનાથો વિચક્ષણૈઃ ॥ ૯૨ ॥

ગણેશાદપરો લોકે વિઘ્નહર્તા ન વિદ્યતે ।

તસ્માદન્વહમારાધ્યો ગણેશઃ સર્વસિદ્ધિદઃ ॥ ૯૩॥

કાશીનિવાસસિધ્યર્થં વિષ્ણુના પૂજિતઃ પુરા ।
પુરા વિઘ્નેશ્વરઃ સમ્યક્પૂજિતો દણ્ડપાણિના ॥ ૯૪॥

કાર્કોટકેણ નાગેન ગણેશ પૂજિતઃ પુરા ।
શેષેણ પૂજિતઃ પૂર્વં ગણેશઃ સિદ્ધિદાયકઃ ॥ ૯૫॥

કાશીયાત્રાર્થમુદ્યુક્તો વિધિર્વિઘ્નકુલાકુલઃ ।
પૂજયામાસ વિઘ્નેશં વિધિવદ્ભક્તિપૂર્વકમ્ ॥ ૯૬॥

સૂર્યેણાભ્યર્ચિતં પૂર્વં ચન્દ્રેણેન્દ્રેણ ચ પ્રિયે ।
દેવૈરન્યૈશ્ચ વિધિવત્પૂજિતો ગણનાયકઃ ॥ ૯૭॥

મર્ત્યાનામમરાણાં ચ મુનીનાં ચ વરાનને ।
ન સિધ્યન્ત્યેવ કાર્યાણિ ગણેશાભ્યર્ચનં વિના ॥ ૯૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે કાશીસ્થિતાન્ પઞ્ચવિનાયકપૂજોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૨ । ૮૩-૯૮॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 12 . 83-98..

Notes:
Śiva શિવ tells Pārvatī પાર્વતી about the importance of worshiping Pañcavināyaka-s પઞ્ચવિનાયકાઃ of Kaśī કાશી; viz., Arkavighneśvara અર્કવિઘ્નેશ્વર, Āśāvināyaka આશાવિનાયક, Siddhivināyaka સિદ્ધિવિનાયક, Senāvināyaka સેનાવિનાયક, Durgāvināyaka દુર્ગાવિનાયક.
Kaśī કાશી harbors several TīrthaKṣetra તીર્થક્ષેત્ર that are outlined in ŚivaRahasyam saptāṃśaḥ શિવરહસ્યં સપ્તાંશઃ.

Proofread by Ruma Dewan

*Kashisthitan Panchavinayakapujopadesham*
pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*